## 6.3.5

**संस्थायां ACP डाटा शिक्षकाणां CAS डाटा शिक्षकेतरकर्मचारिणां कार्यनिष्पादनज्ञापनप्रणाली वर्तते।**

Answer:

सर्वेषां शैक्षिककर्मचारिणां प्रशासनिककर्मचारिणां च कार्यनिष्पादनप्रणाली गोपनीयं विवरणं च संस्कृतविश्वविद्यालयस्य तथा राज्यसर्वकारस्य नियमानुगुणं सम्पाद्यते । सर्वविधप्रक्रियाः विश्वविद्यालय–अनुदान–आयोगस्य मानकमवलम्ब्य आन्तरिकगुणवत्ताप्रकोष्ठेन क्रियते ।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य परिसरीयाः सर्वे शिक्षकाणांः शिक्षकेतरकर्मचारिणाश्च निर्दिष्टनियमानुगुणं विभागाध्यक्षः कार्यनिष्पादनस्य प्रपत्रं परिपूरयन्ति ।

प्रपत्राणाम् आधारेण योग्याध्यापकेभ्यः कर्मचारिभ्यश्च पदोन्नतिः अन्ये लाभाश्च दीयन्ते । एतत् मूल्याङ्कनं प्रतिवर्षं भवति । एतेषां कर्मचारिणां कार्यनिष्पादनस्य मूल्याङ्कनं च भवति । यथा –

**(क) सर्वेषां नियमितशैक्षिककर्मचारिणाम् ।**

**(ख) सर्वेषां नियमितप्रशासनिककर्मचारिणाम् ।**

**(ग) सर्वेषाम् अनुबन्धितशैक्षिककर्मचारिणाम् ।**

**(घ) सर्वेषाम् अनुबन्धितप्रशासनिककर्मचारिणाम् ।**

सर्वेषां कर्मचारिणां नाम, अर्हता, परिचायकपत्रम्, विभागः , कार्यस्थानम्, शैक्षिकसत्रम् इत्यादीनाम् उल्लेखः प्रपत्रे क्रियते। सर्वेषां नियमितशैक्षिककर्मचारिणाम् अनुबन्धितशैक्षिककर्मचारिणाम् अतिथिशैक्षिककर्मचारिणाम् तदितराणां च आत्ममूल्याकलनेन सम्बद्धं विवरणं प्रपत्रस्य प्रथमभागे वर्तते। तत्र एते अंशाः पूरणीयाः भवन्ति। यथा –

1. नाम, पदवी, सङ्केतः , स्तरः

2. प्रथमनियुक्तेः विवरणम्, नियुक्तेः निवृत्तेश्च तिथिः

3. शैक्षिकयोग्यताः

4. स्थिरोद्योगीध्संविदाध्आंशकालिकः इत्यस्य पदस्य उल्लेखः ।

ततः स्नातकस्नातकोत्तरस्तरीयाणां शिक्षकाणाम् कक्ष्याकार्यादीनाम् उल्लेखः वर्तते। यथा–

1. सत्रे वितीर्णाः कालांशाः

2. सत्रे स्वीकृताः कालांशाः

3. प्रायोगिककार्यार्थं वितीर्णाः कालांशाः

4. प्रायोगिककार्यार्थं स्वीकृताः कालांशाः

5. कक्ष्यादीनाम् अस्वीकरणे हेतवः

शिक्षकाणां शोधप्रवृत्तेः मूल्याकलनव्यवस्था अपि विश्वविद्यालयेन क्रियते। यथा –

1. वर्षेऽस्मिन् मार्गदर्शकत्वेन स्वीकृतानां शोधच्छात्राणां सङ्ख्या ।

2. उपाधिप्राप्तवतां शोधच्छात्राणां सङ्ख्या ।

3. शोधपरियोजनानां विवरणम् –कृतानां करिष्यमाणानां च सङ्ख्या ।

4. धनदायिनी संस्था ।

5. मुख्यः गवेषकः ।

6. प्राप्यपरिणामाः ।

7. राष्ट्रिये अन्ताराष्ट्रिये च स्तरे शोधपत्राणि प्रस्तुतीकृतं चेत्तर्हि तद्विषये विवरणम् ।

8. शोधकेन्द्रितसङ्गोष्ठ्यादिषु भागग्रहणस्य उल्लेखः ।

9. पुस्तकप्रकाशनादीनि कार्याणि ।

10. रचनात्मकसर्जनात्मकगतिविधीनाम् उल्लेखः ।

11. सभायाः कार्यशालायाः राष्ट्रियसङ्गोष्ठ्याः तदितरेषां कार्यक्रमाणां संयोजकत्वेन कृतकार्यस्य विवरणम् ।

12. शिक्षकैः प्रयुज्यमानानां प्राविधिकोपकरणानां पुनः शिक्षणार्थं गवेषितानां च नूतनोपकरणानाम् उल्लेखः ।

एतत्सम्बद्धानि अधिकविवरणानि कृतकार्याणां प्रमाणैः सह प्रपूर्य कर्मचारिणा दीयते। अधिकारी पृथक्तया प्रमाणीकरणं करोति। प्रतिवेदनाधिकारी अधोलिखितानां विवरणं पूरयति । यथा –

1. विषयज्ञानम्

2. विषयज्ञानवर्धनाय शिक्षकेण कृताः प्रयासाः

3. शिक्षणसामर्थ्यम्

4. नियमितता

5. शिक्षायाः गुणवत्ता

6. छात्रैः सह सम्बन्धः

7. सहोद्योगिभिः सह सम्बन्धः

8. योजनानिर्माणक्षमता

9. साधनसम्पन्नता

10. भागग्राहिता इत्यादीनि।

समीक्षकाधिकारिणा अधोलिखिताः सारांशरूपेण लिख्यन्ते। यथा –

1. शिक्षकाणां शिक्षकेतरकर्मचारिणां च कार्याणि अत्युत्तमानि सन्ति।

2. शिक्षकाणां शिक्षकेतरकर्मचारिणां च कार्याणि उत्तमानि सन्ति।

3. शिक्षकाणां शिक्षकेतरकर्मचारिणां च कार्याणि तृप्तिकराणि सन्ति।

4. शिक्षकाणां शिक्षकेतरकर्मचारिणां च कार्याणि अतृप्तिकराणि सन्ति।

अत्र सर्वत्रापि अधिकारी प्रत्येकमपि शिक्षकस्य कार्यनिष्पादनस्य विवरणं व्यक्तिशः वस्तुनिष्ठरूपेण च पूरयति। तत्प्रतिवेदनम् अतीव महत्त्वपूर्णं भवति।

1. शिक्षकस्य शिक्षकेतरकर्मचारिणः चरित्रम् अत्युत्तमम् अस्ति।

2. शिक्षकस्य शिक्षकेतरकर्मचारिणः समन्वयः अत्युत्तमः अस्ति।

3. शिक्षकस्य शिक्षकेतरकर्मचारिणः प्रतिपुष्टिः अत्युत्तमा अस्ति।

4. शिक्षकस्य शिक्षकेतरकर्मचारिणः अन्यः कोऽपि विशेषांशः अस्ति चेत्तर्हि तस्य उल्लेखः ।

एवं विश्वविद्यालयस्य शिक्षकाणां शिक्षकेतरकर्मचारिणां कार्यनिष्पादनज्ञापनप्रणाली व्यवस्थिता वस्तुनिष्ठा च प्रचलति।

6.3.7